M. T. B. COLLEGE, SURAT

*Manuscripts Library*

No. Ref.
Ser. 1479

Title : Sarirak Bhashya

1479

InComplete

| | | |
|---|---|---|
| Saririk Bhasya | | Title |
| | | Author |
| | | Editor |
| 811 | | Year, Vols. |
| | | Publisher |
| 1479 | | Remarks |

यावन्नाम्नो गतं तत्रास्य यथाकामचारो भवति । मनो वाव वाचो भूय इत्यादिना स चायं फलविशेषः प्रतीकतंत्रत्वादुपासना
नामुपपद्यते । ब्रह्मतंत्रत्वं तु ब्रह्मणो विशिष्टत्वात् कथं फलविशेषः स्यात् तस्मान्न प्रतीकालंबनानामितरैस्तुल्यफलत्वमिति
॥छ॥ ॥ इति श्रीमद्गोविंदभगवत्पूज्यपादशिष्यस्य श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीमच्छंकरभगवतः कृतौ
श्रीमच्छारीरकमीमांसाभाष्ये चतुर्थस्याध्यायस्य तृतीयपादः समाप्तः ॥३॥ संपद्याविर्भावः स्वेनशब्दात् ॥१॥ एवमे
वैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यत इति श्रूयते तत्र संशयः किं देवलोका
द्युपभोगस्थानेष्विवागंतुकेन केनचिद्विशेषेणाभिनिष्पद्यते आहोस्वित् आत्ममात्रेणेति किं तावत्प्राप्तं स्थानांतरेष्विवागंतुकेन केनचिद्रू
पेणाभिनिष्पत्तिः स्यात् मोक्षस्यापि फलत्वप्रसिद्धेरभिनिष्पद्यत इति च उत्पत्तिपर्यायत्वात् स्वरूपमात्रेण चेदभिनिष्पत्तिः पू
र्वास्वप्यवस्थासु स्वरूपानपायाद्विभाव्येत तस्माद्विशेषेण केनचिदभिनिष्पद्यत इत्येवं प्राप्ते ब्रूमः केवलेनैवात्मनाविर्भव
ति न धर्मांतरेणेति । कुतः स्वेन रूपेणाभिनिष्पद्यत इति स्वशब्दात् अन्यथा हि स्वशब्देनेति विशेषणमनवकॢप्तं स्यात् ननु आत्मीया
भिप्रायः स्वशब्दो भविष्यति न तस्यावचनीयत्वात् येनैव हि केनचिद्रूपेणाभिनिष्पद्यते तस्यैवात्मीयत्वोपपत्तेः स्वेनेति वि
शेषणमनर्थकं स्यात् आत्मवचनतया तु अर्थवत् केवलेनैवात्मरूपेणाभिनिष्पद्यते नागंतुकेनापररूपेणापीति कः पुनर्वि
शेषः पूर्वास्ववस्थास्विह च स्वरूपानपायसाम्ये सतीत्यत आह ।छ॥ मुक्तः प्रतिज्ञानात् ॥२॥ योऽत्राभिनिष्पद्यत इत्युक्तः
स सर्वबंधविनिर्मुक्तः शुद्धेनैवात्मनावतिष्ठते पूर्वत्र तु अंधो भवत्यपि रोदितीव विनाशमेवापीतो भवतीति चावस्था
स्त्ययं त्रयकलुषितेनात्मना इत्ययं विशेषः कथं पुनरवगम्यते मुक्तोऽयमिदानीं भवतीति प्रतिज्ञानादित्याह । तथाहि

श्रा०भा० तेभूयोनुव्याख्यास्यामीत्यवस्थात्रयदोषविहीनमात्मानं व्याख्यायत्वेन प्रतिज्ञाय शरीरं वावसंतं न प्रियेस्पृशत...
यन्यस्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषो भवतीति चोपसंहरति। तथा व्याख्येयः कोपक्रमे य आत्मापहतपाप्मेत्या
दिप्रकृतात्मविषयमेव प्रतिज्ञानं फलत्वप्रसिद्धिरपि मोक्षस्यैव न निवृत्तिमात्रापेक्षा नापूर्वोपजनापेक्षा यदप्यभिनि
ष्पद्यत इत्युत्पत्तिपर्यायत्वं तदपि पूर्वावस्थापेक्षया यथा रोगनिवृत्तावरोगो निष्पद्यत इति तद्वत्तस्माददोषः ॥१॥ आ
त्मा प्रकरणात् ॥२॥ कथं पुनर्मुक्त उच्यते यावत्परं ज्योतिरुपसंपद्येति कार्यगोचरमेवैनमावर्तते ज्योतिःशब्द
दि= स्य भौतिके ज्योतिषि रूढत्वान्न चानर्तितपाप्मविकारविषयत्वात्कश्चिन्मुक्तो भवितुमर्हतीति विकारस्यार्तत्वप्रसिद्धेरिति ने
षदोषो यतः आत्मैवात्र ज्योतिःशब्देनाभिधीयते प्रकरणात् य आत्मापहतपाप्मा विजरो विमृत्युरिति प्रकृते परस्मिन्नात्मनि
नाकस्माद्भौतिकं ज्योतिः शक्यं ग्रहीतुं प्रकृतहानाप्रकृतप्रक्रियाप्रसंगात् ज्योतिःशब्दश्चात्मन्यपि दृश्यते तं देवा ज्यो
तिषां ज्योतिरित्ति प्रपंचितं चैतत् ज्योतिर्दर्शनादित्यत्र ॥२॥ अविभागेन दृष्टत्वात् ।३॥ परं ज्योतिरुपसंपद्य स्वेन रूपेणा
भिनिष्पद्यते यः स किं परस्मादात्मनः पृथगेव भवत्युत ताविभागेनैवावतिष्ठत इति वीक्षायां स तत्र पर्येतीत्यधिकरणा
धिकर्त्रव्यपदेशात् ज्योतिरुपसंपद्येति च कर्तृकर्मनिर्देशात् भेदेनैवावस्थानमिति यस्य मतिस्संपत्स्यत्युत्पादयति ॥
अविभक्त एव परेणात्मना मुक्तोवतिष्ठते कुतो दृष्टत्वात् तथा हि तत्त्वमस्य हं ब्रह्मास्मि यत्र नान्यत्पश्यति न तु तद्द्वितीय
मस्ति ततोन्यद्विभक्तं यत्पश्येदित्येवमादीनि वाक्यान्यविभागेनैव परमात्मानं दर्शयन्ति यथा दर्शनमेव फलं शु
द्धं तत्रैव न्यायाद्यथोदकं शुद्धे शुद्धमासिक्तं तादृगेव भवति एवं मुनेर्विजानत आत्मा भवति गौतमेति चैवमादी २१

निमुक्तस्वरूपनिरूपणपराणि वाक्यान्यविभागमेव दर्शयन्ति नदीसमुद्रादिनीतिदर्शनाच्च भेदनिर्देशस्त्वभेदेप्युपचर्यते स भ
गवः कस्मिन्प्रतिष्ठित इति स्वे महिम्नीति आत्मरतिरात्मक्रीड इति चैवमादिदर्शनात् ॥३॥ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः
॥५॥ स्थितमेतत्स्वेन रूपेणात्यन्तात्ममात्ररूपेणाभिनिष्पद्यते नागन्तुकेनापररूपेणेति अधुना तद्विशेषं बुभुत्सायामभि
निधीयते स्वमस्य रूपं ब्राह्मम् अपहतपाप्मत्वादिसत्यसंकल्पत्वावसानं तथा सर्वज्ञत्वं सर्वेश्वरत्वं च तेन स्वरूपेणाभि
निष्पद्यते इति जैमिनिराचार्यो मन्यते। कुतः उपन्यासादिभ्यस्तथा ह्यवगमात्। तथा हि य आत्मापहतपाप्मेत्यादिना
सत्यकामः सत्यसंकल्प इत्यंतेनोपन्यासेनैवमात्मकतामात्मनो बोधयति तथा स तत्र पर्येति जक्षत्क्रीडन्रममा
णः इत्यैश्वर्यरूपमावेदयति तस्य सर्वेषु लोकेषु कामचारो भवतीति च। सर्वज्ञः सर्वेश्वर इत्यादिव्यपदेशाश्चैवमुपपन्ना
भविष्यन्तीति ॥५॥ चितितन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥६॥ यद्यप्यपहतपाप्मत्वादयो भेदेनैव धर्मा निर्दिश्यन्ते
तथापि शब्दविकल्पजा एवैते पाप्मादिनिवृत्तिमात्रं हि तत्र गम्यते चैतन्यमेव त्वस्यात्मनः स्वरूपमिति तन्मात्रेण स्वरूपेणाभि
निष्पत्तिर्युक्ता तथा च श्रुतिः एवं वा अरेयमात्मानन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एवेत्येवंजातीयका अनुगृहीता भविष्यन्ती
ति सत्यकामत्वादयः। यद्यपि वस्तुरूपेणैव धर्मा उच्यंते सत्याः कामा अस्येति तथाप्युपाधिसंबंधाधीनत्वात्तेषां न चैत
न्यवत्स्वरूपत्वसंभवोनेकाकारत्वप्रतिषेधात् प्रतिषिद्धं हि ब्रह्मणोनेकाकारत्वं न स्थानतोपि परस्योभयलिंगमित्यत्र
अत एव जक्षणादिसंकीर्तनमपि दुःखाभावमात्राभिप्रायं स्तुत्यर्थमात्मरतिरित्यादिवन्नहि मुख्यान्येव रतिक्रीडामिथु
नान्यात्मनिमित्तानि शक्यन्ते वर्णयितुं द्वितीयविषयत्वात्तेषां तस्मान्निरस्ताशेषप्रपंचेन प्रसन्नेनाव्यपदेश्येन बोधा

ब्र०भा० स्मनाभिनिष्पद्यते इत्यौडुलोमिराचार्यो मन्यते ॥ ६ ॥ एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॥ ७ ॥ एवमपि पार-
मार्थिके चैतन्यमात्रस्वरूपाभ्युपगमे व्यवहारापेक्षया पूर्वस्याप्युपन्यासादिभ्योऽवगतस्य ब्राह्मस्यैश्वर्यरूपस्याप्र-
त्याख्यानादविरोधं बादरायण आचार्यो मन्यते ॥ ७ ॥ संकल्पादेव तु तच्छ्रुतेः ॥ ८ ॥ हार्दविद्यायां श्रूयते स यदि पितृलोक-
कामो भवति संकल्पादेवास्य पितरः समुत्तिष्ठन्तीत्यादि तत्र संशयः किं संकल्प एव केवलः पित्रादिसमुत्थाने हेतुरुत नि-
मित्तान्तरसहित इति तत्र सत्यपि संकल्पादेवेति श्रवणे लोकवन्निमित्तान्तरापेक्षा युक्ता यथा लोकेऽस्मदादीनां संक-
ल्पाद्गमनादिभ्यश्च हेतुभ्यः पित्रादिसंपत्तिर्भवत्येवं मुक्तस्यापि स्यादेवं हि दृष्टविपरीतं न कल्पितं भविष्यति संकल्पा-
देवेति तु राज्ञ इव संकल्पितार्थसिद्धिकरसाधनान्तरसामग्रीसुलभतापेक्षयोच्यते न च संकल्पमात्रस-
संपाद= मुत्थानाः पित्रादयो मनोरथविजृम्भितवच्चञ्चलत्वात्पुष्कलं भोगं समर्पयितुं पर्याप्नुयुरित्येवं प्राप्ते ब्रूमः
संकल्पादेव तु केवलात्पित्रादिसमुत्थाननिमित्तमुत तच्छ्रुतेः संकल्पादेवास्य पितरः समुत्तिष्ठन्तीत्यादिका हि सु=
श्रुतिर्निमित्तान्तरापेक्षायां पीड्येत निमित्तान्तरमपि तु यदि संकल्पानुविधाय्येव स्यात्संकल्पानन्तरप्रयत्नान्तरसं-
पाद्यं निमित्तान्तरमीप्स्यते प्राकृतवत्संपत्तेर्वन्ध्यसंकल्पत्वप्रसंगान्न च श्रुतिगम्येऽर्थे लोकवदिति सामान्यतो दृ-
ष्टं क्रमते संकल्पबलादेव चैषां यावत्प्रयोजनं स्थैर्योपपत्तिः प्राकृतसंकल्पविलक्षणत्वान्मुक्तसंकल्पस्य ॥
अत एव चानन्याधिपतिः ॥ ९ ॥ अत एव चावन्ध्यसंकल्पत्वादनन्याधिपतिर्विद्वान्भवति नान्योऽधिपतिर्भवती २१६
स्या°

त्यर्थः न हि प्राकृतोऽपि संकल्पयन्नन्यस्वामिकतामात्मनः सत्यां गतौ संकल्पयति श्रुतिश्चैतद्दर्शयति अथ य इहात्मानमनु-
विद्य व्रजन्त्येतांश्च सत्यान्कामांस्तेषां सर्वेषु कामचारो भवतीति ॥ ९ ॥ अभावं बादरिराह ह्येवम् ॥ १० ॥ संकल्पादेवास्य पितरः समुत्ति-
ष्ठन्तीत्यतः श्रुतेर्मनस्तावत्संकल्पसाधनं सिद्धं शरीरेन्द्रियाणि पुनः प्राप्तैश्वर्यस्य विदुषः सन्ति न वा इति समीक्ष्यते तत्र बादरि-
स्तावदाचार्यः शरीरस्येन्द्रियाणां चाभावं महीयमानस्य विदुषो मन्यते कस्मादेवं ह्याह आम्नायो मनसैतान्कामान्पश्यन्रम-
ते य एते ब्रह्मलोक इति यदि मनसा शरीरेन्द्रियैश्च विहरेत मनसेति विशेषणं न स्यात्तस्मादभावः शरीरेन्द्रियाणां
विहरेत ॥ १० ॥ भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥ जैमिनिस्त्वाचार्यो मनोवच्छरीरस्यापि सेन्द्रियस्य भावं शरीरेन्द्रिय-
विसेन्द्रियस्य भावं मुक्तं प्रति मन्यते यतः स एकधा भवति त्रिधा भवतीत्यादिनानेकधाभावविकल्पमामनन्ति न ह्यनेक-
विधता विना शरीरभेदेनाञ्जसी स्याद्यद्यपि निर्गुणायां भूमविद्यायामयमनेकधाभावविकल्पः पठ्यते तथापि
विद्यमानमेवेदं सगुणावस्थायामैश्वर्यं भूमविद्यास्तुतये संकीर्त्यत इत्यतः सगुणविद्याफलभावेनोपतिष्ठत इत्युच्यते
। द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥ बादरायणः पुनराचार्योऽत एवोभयलिङ्गश्रुतिदर्शनादुभयलिङ्ग-
श्रुतिदर्शनादुभयविधत्वं साधु मन्यते यदा सशरीरतां संकल्पयति तदा सशरीरो भवति यदा त्वशरीरतां तदा-
ऽशरीर इति सत्यसंकल्पत्वात्संकल्पवैचित्र्याच्च द्वादशाहवद्यथा द्वादशाहः सत्रमहीनश्च भवत्युभयलिङ्ग-
तद= श्रुतिदर्शनादेवमिदमपीति ॥ १२ ॥ तन्वभावे संध्यवदुपपत्तेः ॥ १३ ॥ यदा तनोः सेन्द्रियस्य शरीरस्याभावस्तदा य-

मात्रेणा-

शा०भा० यासंभवोऽस्थाने शरीरेन्द्रियैर्विषयेष्वविद्यमानेष्वप्युपलब्धिमात्रं एवं पित्रादिकामा भवन्त्येवं मोक्षेऽपि स्युरेवं ह्येतदुपपद्यते ॥छ॥ भावे जाग्र
२१५ द्वत् ॥१४॥ भावे पुनस्तनोर्यथा जागरिते विद्यमाना एवं पित्रादिकामा भवन्त्येवमस्याप्युपपद्यन्ते ॥ प्रदीपवदावेशस्तथा हि दर्शयति ॥१५॥
भावं जैमिनिर्विकल्पामननादित्यत्र शरीरत्वमुक्तस्योक्तं तत्र विधाभावादिष्वनेकशरीरसर्गे किं निरात्मकानि शरीराणि दारुयन्त्रवत्सृज्य
तत्रा- ते । किं वा सात्मकान्यस्मदादिशरीरवदिति भवति वीक्षा। तत्रात्ममनसोर्भेदानुपपत्तेरेकेन शरीरेणायोगादितराणि निरात्मकानीत्येवं
प्राप्ते प्रतिपद्यते प्रदीपवदावेश इति यथा हि प्रदीप एकोऽनेकप्रदीपभावमापद्यते विकारशक्तियोगादेवमेकोऽपि सन्विद्वानैश्व
र्ययोगादनेकभावमापद्य सर्वाणि शरीराण्याविशति कुतस्तथा हि दर्शयति शास्त्रमेकस्यानेकधाभावं स एकधा भवति त्रिधा भव
ति पंचधा सप्तधा नवधेत्यादिना नैतद्दारुयन्त्रोपमाभ्युपगमेऽवकल्प्यते नापि जीवान्तरावेशे न च निरात्मकानां शरीराणां प्रवृ
त्तिः संभवति यत्त्वात्ममनसोर्भेदानुपपत्तेरनेकशरीरयोगासंभव इति नैष दोषः एकमनोऽनुवर्तीनि समनस्कान्येवापराणि
शरीराणि सत्यसंकल्पत्वात्स्रक्ष्यति सृष्टेषु चतेषूपाधिभेदादात्मनोऽपि भेदो नाधिष्ठातृत्वेन योत्स्यते एषैव च योगशास्त्रेषु योगिना
मनेकशरीरयोगप्रक्रिया कथं पुनर्मुक्तस्यानेकशरीरावेशादिलक्षणमैश्वर्यमभ्युपगम्यते यावता तत्केन कं विजानीयात् न तु तद्द्वि
तीयमस्ति ततोऽन्यद्विभक्तं यद्विजानीयात् सलिल एको द्रष्टाद्वैतो भवतीति चैवंजातीयका श्रुतिर्विशेषविज्ञानं वारयतीति अत उत्त
रं पठति ॥छ॥ स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥१६॥ स्वाप्ययः सुषुप्तं स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्ष
त इति श्रुतेः संपत्तिः कैवल्यं ब्रह्मैव सन्ब्रह्माप्येतीति श्रुतेस्तयोरन्यतरामवस्थामपेक्ष्यैतद्विशेषसंज्ञाभाववचनं क्वचित्सुषुप्ताव २१

स्थामपेक्ष्योच्यते। क्वचित्कैवल्यावस्थां कथमवगम्यते यत्रास्त्येवैतदधिकारवशादाविःकृतमेतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्य
ति न प्रेत्य संज्ञास्तीत्यत्र यत्र त्वस्य सर्वमात्मैवाभूत् यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यतीत्यादिश्रुतिभ्यः सगुणविद्याविपाक
स्थानं त्वेतत्स्वर्गादिवद्देवावस्थान्तरं यत्रैतदैश्वर्यमुपवर्ण्यते तस्माददोषः ॥छ॥ जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च ॥१७॥ ये स
गुणब्रह्मोपासना सहैव मनसेश्वरसायुज्यं व्रजन्ति किं तेषां निरवग्रहमैश्वर्यं भवत्याहोस्वित्सावग्रहमिति संशयः किं तावत्प्राप्तं नि
रंकुशमेवैषामैश्वर्यं भवितुमर्हति आप्नोति स्वाराज्यं सर्वेऽस्मै देवा बलिमावहन्ति तेषां सर्वेषु लोकेषु कामचारो भवतीत्यादिश्रुति
इत्येवं प्राप्ते पठति जगद्व्यापारवर्जमिति जगदुत्पत्त्यादिव्यापारं वर्जयित्वाऽसंनिहितत्वाच्चेतरेषां पर एव हीश्वरो जगद्व्यापा
रेऽधिकृतस्तमेव च प्रकृत्योत्पत्त्याद्युपदेशान्नित्यशब्दनिबंधनत्वाच्च तदन्वेषणविजिज्ञासनपूर्वकं त्वितरेषामणिमाद्यैश्वर्यं श्रूयते
तेनासंनिहितास्ते जगद्व्यापारे समनस्कत्वाच्चैषामनेकमत्ये कस्यचित्स्थित्यभिप्रायः कस्यचित्संहाराभिप्राय इत्येवं विरोधोऽपि
कदाचित्स्यादथ कस्यचित्संकल्पमन्वन्य इत्यविरोधः समर्थ्यते ततः परमेश्वराकूततंत्रत्वमेवेतरेषामिति व्यवतिष्ठते ॥छ॥ प्रत्यक्षो
पदेशादिति चेन्नाधिकारिकमंडलस्थोक्तेः ॥१८॥ अथ यदुक्तमाप्नोति स्वाराज्यमित्यादिप्रत्यक्षोपदेशान्निरवग्रहमैश्वर्यं विदुषां न्या
य्यमिति तत्परिहर्तव्यमत्रोच्यते नायं दोषः आधिकारिकमंडलस्थोक्तेराधिकारिको यः सवितृमंडलादिषु विशेषायतनेषु व्यवस्थितः
परमेश्वरस्तदायत्तैवेयं स्वाराज्यप्राप्तिरुच्यते यत्कारणमनंतरमाप्नोति मनसस्पतिमित्याह यो हि सर्वमनसां पतिः पूर्वसिद्ध ई

शा०भा० श्वरस्तं प्राप्नोत्येतच्च भवति तदनुसारेणैव त्वानंतरं वाक्यं वाक्पतिश्चक्षुष्पतिः श्रोत्रपतिर्विज्ञानपतिश्च भवतीत्याह ।। एवमन्यत्रापि यथा
संभवं नित्यसिद्धेश्वरायत्तमेवेतरेषामैश्वर्यं योजयितव्यं ।। छ ।। विकारावर्ति च तथा हि स्थितिमाह ।। १९ ।। विकारावर्त्यपि च नित्यमु
२२० क्तं पारमेश्वरं रूपं न केवलं विकारमात्रगोचरं सवितृमंडलाद्यधिष्ठानं तथा ह्यस्य द्विरूपां स्थितिमाहाम्नायः तावानस्य महिमा ततो
ज्यायांश्च पूरुषः पादोस्य सर्वा भूतानि त्रिपादस्यामृतं दिवीत्येवमादिः न च तन्निर्विकाररूपमितरालंबनाः प्राप्नुवंतीति शक्यं वक्तुं
अतत्क्रतुत्वात्तेषामतश्च यथैव द्विरूपे परमेश्वरे निर्गुणं रूपमनवाप्य सगुण एवावतिष्ठंते एवं सगुणेपि निरवग्रहमैश्वर्यमनवा
प्य सावग्रह एवावतिष्ठंते इति द्रष्टव्यं ।। छ ।। दर्शयतश्चैवं प्रत्यक्षानुमाने ।। २० ।। दर्शयतश्च विकारावर्तित्वं परस्य ज्योतिषः श्रु
तिस्मृती न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निरिति न तद्भासयते सूर्यो न शशांको न पावकः इति च तदेवं
विकारावर्तित्वं परस्य ज्योतिषः प्रसिद्धमित्यभिप्रायः ।। छ ।। भोगमात्रसाम्यलिंगाच्च ।। २१ ।। इतश्च न निरंकुशं विकारालंबनामै
श्वर्यं यस्माद्भोगमात्रमेषामनादिसिद्धेनेश्वरेण समानमिति श्रूयते तदाहापो वै खलु मीयंते लोकः स यथैतां देवतां सर्वाणि भू
तान्यवंत्येवं हैवंविदं सर्वाणि भूतान्यवंतीति तेनो एतस्यै देवतायै सायुज्यं सलोकतां जयतीत्यादिभेदव्यपदेशलिंगेभ्यः ननु चैवं स
तिसातिशयत्वादंतवत्त्वमैश्वर्यस्य स्यात्ततश्चैषामावृत्तिः प्रसज्येतेति अत उत्तरं भगवान्बादरायण आचार्यः पठति ।। छ ।। अ
नावृत्तिः शब्दादनावृत्तिः शब्दात् ।। २२ ।। नाडीरश्मिसमन्वितेनार्चिरादिपर्वणा देवयानेन पथा ये ब्रह्मलोकं शास्त्रोक्तविशेषं २२०

शा०भा० गच्छंति । यस्मिन्नरश्च ण्यश्चार्णवौ ब्रह्मलोके तृतीयस्यामितो दिवि यस्मिन्नैरंमदीयं सरो यस्मिन्नश्वत्थः सोमसवनो यस्मिन्नपराजिता पू २२१
र्ब्रह्मणो यस्मिंश्च प्रभुनिर्मितं हिरण्मयं वेश्म यश्चानेकधा मंत्रार्थवादादिप्रदेशेषूपवर्ण्यते ते तं प्राप्य न चंद्रलोकादिवद्भुक्तभोगा आ
२२१ वर्तंते कुतस्तयोर्ध्वमायन्नमृतत्वमेतीति तेषां न पुनरावृत्तिरेतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तंते ब्रह्मलोकमभिसंपद्यते न च पुन
रावर्तत इत्यादिशब्देभ्यः अंतवत्त्वेपि त्वैश्वर्यस्य यथानावृत्तिस्तथा वर्णितं कार्यात्यये तदध्यक्षेण सहातः परमित्यत्र सम्यग्दर्शनवि
ध्वस्ततमसां तु नित्यसिद्धनिर्वाणपरायणानां सिद्धैवानावृत्तिस्तदाश्रयणेनैव हि सगुणशरणानामप्यनावृत्तिसिद्धिरिति अना
वृत्तिः शब्दादनावृत्तिः शब्दादिति सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयति ।। [redacted] ।। इति श्रीमद्गोविंदभगवत्पूज्यपादशिष्यस्य श्रीमत्परम
हंसपरिव्राजकाचार्यस्य श्रीमच्छंकरभगवत्पादकृतौ श्रीमच्छारीरक मीमांसाभाष्ये चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः ।। ॐ ।।

२२१

शारीरभाष्य